शब्द–ब्रह्म
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका
ISSN 2320 – 0871
17 अप्रैल 2014

# सट्टक स्वरूपं एवं रूपकभेदेषु सट्टकस्य स्थानं

प्रा.दीपक जोशी
आर्ट्स कालेज, मोडासा
गुजरात, भारत

**(1) सट्टक स्वरूपम्**

नाट्यशास्त्रे नाटकप्रकरणादिन दशरुपकाणी सन्ति। तादृशाणी एव प्रकरणी त्रोटक: सट्टकादी उपरुपकाणी अपि प्रसिद्धानि सन्ति। उपरूपकेषु कानिचिद नृत्यप्रधानानि अभिनयप्रधानानि च सन्ति। तेषाम स्वरूपं रूपकवत भवति। अन्यानि रूपकाणी नृत्यप्रधानानि सन्ति। अभिनय प्रधानेषु उपरूपकेषु सट्टकस्य अगर स्थानं वर्तते।

सर्वप्रथम वात्स्यायन कामसूत्रे ऊपरुपकाणाम उल्लेखयो वर्तते, परन्तु तत्र सट्टकस्य निर्देशो नैव वर्तते।1 भरतस्य अनुगामिना कोहलेन सर्वप्रथमम ऊपरुपकेषु सट्टकस्य निर्देश: कृत: इति नाट्यशास्त्रस्य वृत्तिकारेण अभिनवेन नाट्यदर्पणकारेण दर्शितं।2 सट्टकस्य उल्लेख: अन्यत्रापि अभिनवेन कृतो वर्तते।3

अस्य उपरुपकस्य लक्षण निर्देश: सर्वप्रथमम राजशेखरेण स्वरचिते सट्टके कर्पूरमंजरी नाम्नी कृतिर: यथा 4

सो सट्टओ त्ति भज्जई दूरं जो जादीआई अजुहरई
कि उण पवेसदिकख़मभन्काई केवलं ज दीसंती।।

नाट्यशास्त्रस्य ग्रंथे भोजराजेन शृंगारप्रकाशे सर्वप्रथमम एव व्याख्या कृता 5

विषकम्भक प्रवेशकरहितो यस्त्वेकभाषया भवति
अप्राकृतसांकृतया स सट्टको नाटिका प्रतिमा।।

तदनंतर हेमचंद्रादारज्य विश्वनाथपयान्तम सर्वे: नाट्यशास्त्रिभी: सट्टक कृतिभिश्च एतादृशि एव व्याख्या अनुसृता वर्तते।

**(2) रूपकभेदेषु सट्टकस्य स्थानं**

दशरूपकेषु सट्टकस्य स्थानं नैव वर्तते। उपरुपकेषु तस्य स्थानं अतिमहत्वं भजते। अभिनवगुप्तेन नाट्यशास्त्रस्य अष्टादश अध्याये प्रथम कारिकायाम प्रयोगत: शब्दस्य चर्चायाम कथितं प्रयोगतर: प्रकृष्ट: उचितो योग: अर्थात परस्पर सम्बन्ध: अनेन विवेचनेन परस्परसम्बन्ध वैचित्र्यकारणात कोहलेन समर्थितम यत दशरूपके सट्टकस्य भेद: समाविष्ट भवेत्। तेन तु त्रोटकम.सट्टकम.रासकम आदिनाम समावेश: दशरूपे आदृत: ।6

दशरूप इति दशरूपकाणी परन्तु दशमतानाम भावार्थ: अभिनवेन समर्थित: प्रयोगत: शब्दे अनेन दशरूपे सट्टकरासकादिनाम अंतर्भाव कृत्वा भरतसम्मितम अवाप्तुम प्रयत्न: कृता।

डॉ.राघवन महोदय एतस्मिन विषये सम्यक चर्चा कृता।7

नवमशतकस्य अग्निपुराणे अष्टात्रिंशत त्रिंशतअध्याये सप्तमी उपरुपकेषु सट्टकस्य केवलं नाम प्राप्यते। दशरुपके धनंजयेन अस्य कौप्युल्लेखो नैव कृत:। भोजराजेन सट्टकस्य महत्वं आद्दतं। रुपकेषु वाक्यार्थाभिनय पदार्थाभिनयश्च इति द्वौ विभागौ कृतौ। एषु रुपकेषु रसस्य निरुपणं भवति तत्र वाक्यार्थाभिनयो प्रवर्तते। उपरुपकेषु केवलं भावनिरुपणं भवति। पदस्य अर्थं अधिकृत्य रुपकेषु पदार्थाभिनयो आदृतो भवति। सट्टक-नाटिकयोः वाक्यार्थाभिनयस्य संभावनायाः अनयोः उपरुपकयोः समावेषः दशरुपकेषु कृतः।8

शब्द-ब्रह्म
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका
ISSN 2320 – 0871
17 अप्रैल 2014

हेमचंद्रेन अस्मिन् विषये भोजराजं लक्षीकृत्य कथितं यत् केचन सट्टके वाक्यार्थाभिनय कुर्वन्ति।

नाट्यदर्पणकारभ्यं द्वादशरूपकेषु सट्टकस्य निर्देशो नैव कृतः परंतु ग्रंथस्य अंते त्रयोदश उपरुपकेषु सट्टकस्य लक्षणं प्रथमं एव दत्तम यत् -

एतानि च स्वल्पमात्र रंजनानिमित्तत्वाद वृद्धैरनभिरितत्वाच्च वृत्तावेव कीर्तितानि।9

एतेन अनुमीयते यत् सट्टकानां लोकप्रियता प्रसिद्धिश्च नैव विधते। अतः सट्टकस्य व्याख्या कृतेरारंभे सट्टककर्ता ददाति।

भावप्रकाशकारेण स्वग्रंथरूपस्य असृमे अधिकारे दशरुपकाणि रसात्मकानि इति समर्थितम्। अन्येषु रुपकेषु भावात्मकतां प्रदर्श्य सट्टकस्य लक्षणं रसात्मक रूपकं इति समाविष्टं नृत्यभेदात्मकं नाटिका भेदरूपं सट्टकस्य समर्थितं।10

शारदातनयेन परस्पर अभिप्राययोः इदम् अनुमितम्। सट्टके यदा अभिनयतत्वस्य आधिक्यं वर्तते तदा तद रसात्मकं भवेत् परंतु उमीतत्वं अधिकं स्यात् तदा भावात्मकं उपरुपकं भवेत्। प्रतापरुद्रीथने सट्टकस्य निर्देशो नैव कृता परंतु रत्नापण टीकायां कुमारस्वामीना नाटिका सट्टकयो अंतर्भावः दशरूपकेषु आदृतः।11

नाट्यलक्षण रत्नकोषे सागरनन्दीना षट्विंषतीरुपकेषु सट्टकस्य समावेशः कृतः। अनेन आचार्यो रुपकोपरुकयोः भेदा नैव स्वीकृतः।12 विश्वनाथेन साहित्यदर्पणे सट्टक-नाटिकयोः समावेशः अष्टादश उपरुकेषु कृतः।13

नाट्यषास्त्रेषु अभिनव भोजदेवः एव केचन अस्य उपरुपकस्य महत्वं स्वीकुर्वन्ति। मुख्यत्वेन वाक्यार्थाभिनयत्वात् सट्टकं रसात्मकं रुपकं वर्तते। अतः डोम्बी, रासकादि सट्टक उपरुपकेषु पदार्थाभिनय प्रधानेषु उपरुपकेषु गजना कथं कर्तव्या इति विचारणीयम्। सट्टके तु दशरुपकवत् रसनिरुणं भवति। कथावस्तु च सुसंकलितं भवति। अनेकानि पात्राणि भवन्ति, अतः नृत्यप्रधान उपरुपकेषु एकस्य पात्रस्य एव भावार्थाभिनयो भवति। अतः सट्टकं नृत्यप्रधानोपरुपकेभ्य भिन्नमेव।

अभिनवप्रधान रुपक नृत्यप्रधानोपरुपकयोः अयमेव भेदः अभिनवेन नाट्यशास्त्रस्य चतुर्थ अध्याये नृतौ विस्तृता चर्चा कृता वर्तते।14

पादटीपः

*1 वात्स्यायन कामसूत्रः, सं दामोदरलाल गोस्वामी, प्र. चैखम्बा, सं.बुक डिपो, बनारस 1912 ।। 10-25 पृ. 175*

*2 भरत नाट्यशास्त्रम् ग्रंथम-2 (सं.रामकृष्ण कवि, प्र. ओरिएंटल इंस्टीट्यूट, वडोदरा प्र.आ 1934 18-1 वृत्ति-पृ.407, उक्त व्याख्याने तु कोहलादिलक्षित तोटक सट्टकरासकादि संग्रहः फलम्। हिन्दी नाट्यदर्पण (सं. डा.नगेंद्र प्र. दिल्ली विश्वविद्यालय 1961) प्रथमदिवेक पृ.14 तेन कोहक्तप्रजीतलक्ष्मणः साटकदयो न लक्ष्यन्ते)*

*3 भरत-नाट्यशास्त्र ग्रंथ-3 (सं.रामकृष्ण कवि प्र.ओरिएंटल इंस्टीट्यूट वडोदरा प्रथम आवृत्ति 1954, 19.131 वृत्ति पृ.72)*

*4 राजशेखर-कर्पूरमंजरी, सं.प्रो.एन.जी.सुरु, मुंबई, प्र. आवृत्ति 1960 I-6 पृ.3*

*5 भोज, श्रृंगारप्रकाश ग्रंथ-2 (सं. जी.आर.जोरपर, प्र. प्राचीन संस्कृत ग्रंथ प्रकाशन, विश्व संस्था 1963) प्रकाश 11 पृ 466*

*6 नाट्यशास्त्र, ग्रंथ-2, 18.2 वृत्ति पृ. 407*

*7 Raghvan (Dr.) V, A note on the name Dasrupak JOR, Vol VII, part III, p.p. 277-290*

*8 श्रृंगारप्रकाशः ग्रंथ-2 प्रकाश 11 पृ. 466*

*9 हिन्दी नाट्यदर्पण विवेक - 4 पृ. 409*

*10 भावप्रकाशनम् अधिकार-8-5-244, अधिकार 9 पृ. 269*

*11 विद्यानाथ प्रतापरुद्रीयम् (सं.डा.वे.राघवन्, प्रं संस्कृतविद्या समिति, मद्रास, द्वितीय संस्करणम् 1979, नाटक प्रकरणम्, रत्नायज व्याख्या, पृ. 72*

*12 सागरनंदी, नाटक लक्षणरत्कोषः, पृ. 133*

*13 साहित्यदर्पणः, परिच्छेद-6, पृ. 522*

*14 भरत-नाट्यशास्त्र ग्रंथ-1 (सं. एम.रामकृष्ण कवि, प्र. ओरिएंटल इंस्टीटयूट, वडोदरा, द्वितीय आवृत्ति 1956) अध्याय-4 वृत्ति पृ.170-182*